International Journal of Sanskrit Research 2020; 6(5): 68-71

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 68-71
© 2020 IJSR
www.anantaajournal.com
Received: 02-07-2020
Accepted: 06-08-2020

**डॉ० करुणाकरमिश्रः**
संस्कृत शिक्षक: देहलान उपेरली,
हिमाचल प्रदेश, भारत

**Corresponding Author:**
**डॉ० करुणाकरमिश्रः**
संस्कृत शिक्षक: देहलान उपेरली,
हिमाचल प्रदेश, भारत

# दार्शनिकनिकायेषु बुद्धिपदार्थपरिशीलनम्

**डॉ० करुणाकरमिश्रः**

**DOI:** https://doi.org/10.22271/23947519.2020.v6.i5a.1092

**प्रस्तावना**

पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरुपितेश्वरेच्छीयविशेष्यतावत्त्वम्पदार्थत्वम् [1]। अत्र पदार्थविषयकचिन्तनतत्वमाश्रित्योपस्थितशास्त्रेष्वन्यतमन्दर्शनशास्त्रम्। दार्शनिकदीर्घायां रूचीनां वैचित्र्यात् वैषम्यन्दृश्यते तादृशरुचिवैचित्र्यकारणीभूतधावप्यसाम्यमित्यनुशीलनपुरस्सरमुपस्थाप-यामि-दार्शनिकनिकायेषु बुद्धिपदार्थपरिशीलनम् । अत्र वैषम्यन्तु सांख्यवेदान्तादिर्शनेषु यदीयम्महत्त्वेनोपस्थिता तत्तर्हि क्वचिज्ज्ञानपर्यायेन [2] एवञ्च क्वचिज्ज्ञानङ्क्वचित्तत्साधनमपि च द्रव्यं गुणो वेति बहुविधम् । तत्र बुद्धिरेव बुद्धिलक्षणम् [3]। एतत्सर्वमपि भावं स्थिरीकृत्य वैषम्यमूलकवैलक्षण्यानुसंदधन्नयमनुसंधानभावमुपस्थापनाय यतते।

**अत्र बुद्धिपदार्थो व्युत्पत्तिश्च-**

अवगमनार्थकबुध्धातोः बुद्ध्यतेऽनयेति विग्रहे क्तिन् प्रत्यये कृते सति प्रातिपदिकत्वे भवतीदम्पदमुपपन्नम् । मनीषादीनि पदानि पर्यायरूपानि । इयं विवेचना उत ज्ञानजननी आहोस्विदन्तःकरणमित्यादयोर्थाः । बलमप्यस्याः स्वरूपमपि च धर्मपत्नीरूपमिति धार्मशास्त्रम्मानम् ।अत्र महान्तः पौराणिकाः आहुःयत् - या देवी सर्वभूतेषु बुद्धिरूपेणसंस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः [4] इत्यप्स्माभिरवगन्तव्यम्।

**बुद्धिलक्षणानि-**

अत्र शास्त्रेष्वस्याः बहुविधानि लक्षणानि दृश्यन्ते तान्यधोलिखितानि ---
(1) बुद्धित्वसामान्यवती आत्माश्रयप्रकाशो बुद्धिः [5]। (2) अनुभवसिद्धज्ञानत्वजातिरेव वा [6]। (3) जानामि इत्यनुव्यवसायगम्यज्ञानत्वम् [7]। (4) संबन्धा-वच्छिन्नप्रकारतानिरुपितप्रकारितासमानाधिकरणगुणत्वव्याप्यजातिम-त्वम् [8]। (5) आत्मगुणत्वे सत्यर्थप्रकाशः [9]। (6) बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः [10]। (7) निश्चयात्मा निराकारो बुद्धिरित्यभिधीयते [11]। (8) सत्वर-जस्तमोगुणात्मिकाया अनादिपरिणामिनित्यव्यापिप्रकृतेर्जडाया आद्यः-परिणामोऽन्तःकरणरूपो महत्तत्वापरपर्यायो बुद्धिः [12]। (9) अज्ञानान्धतिरस्कारकारकसकलपदार्थस्य अर्थप्रकाशकः प्रदीप इव देदीप्यमानो यःप्रकाशः सा बुद्धिः [13]। (10) विषयप्रवणत्वं बुद्धित्वम् [14]। (11) सर्वव्यवहारहेतुःगुणः [15]।
एतानि लक्षणानि बुद्धिपदार्थप्रकाशकानि दोषत्रयरहितानि दार्शनिकपरिकरे निरूपितानि वर्तन्ते। नीतिकारोप्यस्मिन् सन्दर्भे प्राह यत् बुद्धिः परेङ्गितज्ञानफलात्मिका भवतीति ।अपि च बुद्धिर्यस्य बलं तस्य इति सर्वविदितमेव । एतावता इयमर्थप्रकाशिका, आकाररहिता, विषयसाधिका, हिताहितसाधिका, विषयबोधिका, सदसन्निरूपिका या मानवेषु पार्थक्यमुपस्थापयति सा बुद्धिरिति जगति विदितास्तीति।

**सांख्याभिमता बुद्धिः-** साङ्ख्यदर्शनम्महर्षिकपिलप्रणीतमास्तिकदर्शनेष्वन्यतमम् । अत्र पदपदार्थविचारणायाः या शैलिरस्ति सातीव सरला लोकप्रिया च । अस्य दर्शनस्य मूलन्तु प्रकृतिरस्ति ।दर्शनेऽस्मिन् बुद्धिः महत्पदेन प्रसिद्धास्तीति । तत्र प्रकृतिस्सत्त्वरजस्तमोगुणानां साम्यावस्था विशेषः इति ।पुरुषः प्रकाशमयः । यदा पुरुषस्य प्रकाशः प्रकृतौ पतति तदा सृष्टिरुद्भवतीति इत्यस्य दर्शनस्य प्रस्तावना । पुरुषस्य प्रकाशेन यदा प्रकृतिगताः गुणाः सम्बद्धाःभवन्तीति तदा तेषु गुणेषु परातिशायिणी गतिरुद्भवति । अत्र परप्रकर्षाधिवेलमाविर्भवति सृष्टिः । ततः सृष्टेः या आदावुद्भवा सा महत्पदेन प्रसिद्धा ।इयमेव बुद्धिः । ततः बुद्धेः अहङ्कारः जायते । एवञ्च सांख्यीयभाषायामियम्बुद्धिः प्रकृतिः विकृतिः च [16] । अस्याः स्वरूपमत्रास्तीत्थम्-

> अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्
> सात्त्विकमेतद्रूपं तामसस्तद्विपर्यस्तम् ॥ [17]

अत्राध्यवसायः बुद्धिः इति लक्ष्यलक्षणयोरेकविभक्तित्वादध्यवसायत्व- विशिष्टेति । उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेः रजस्तमो-भिधेये सति यः सत्त्वसमुद्रेकः सोऽध्यवसायोऽथवा कर्तव्यमिति योऽयं निश्चयः चित्सान्निध्यात् प्राप्तचैतन्यायाः बुद्धेः परिणामः [18]। इदम् एवम् एव इति विषयपरिच्छेदकोध्यवसायः [19]। गौडपादभाष्ये हि अध्यवसानम् अध्यवसासः, यथा बीजे भविष्यद्वृत्तिकः अङ्कुरः तद्वदध्यवसायोऽयं घटोऽयं पटोऽयम् इत्यध्यवस्यति [20]। वस्तुतः विषयं विषयं प्रति यत्तत्सम्बन्धितं ज्ञानन्निश्चयात्मकन्तदध्यवसायः ।एतद्धि बुद्धीन्द्रियसंयोगे सति प्रतिविषयविशिष्टो भवति । तस्य दृष्टत्वं सूपपन्नम्भवति [21]। अस्याः अपरं रूपमपीत्थम्-

सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः। सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् [22]॥

अत्रास्य सात्त्विकं तामसिकं रूपन्दृश्यते । धर्मः, ज्ञानं, विरागः, ऐश्वर्यम् अस्याः सात्त्विकमेतद्विपरीतन्तामसमुच्यते [23]। धर्मःमोक्षसाधकः। दयादानयमनियमलक्षणसम्पन्नः। अहिंसादयः यमत्वेन प्रसिद्धाः। नियमाःशौचसंतोषादयः। तत्र प्रकृतिपुरुषयोः प्रतीतिसाधकं ज्ञानम् ।प्रकाशोवगमो भानम्पर्यायोस्याः। शिक्षाकल्पव्याकरणनिरुक्त-च्छन्दोज्योतिषषडङ्गस्वरूमत्र वाह्यमपि च प्रकृतिपुरुष-ज्ञानमाभ्यन्तरम् विगतः रागः यस्यासौ विरागः विरागस्य भावः वैराग्यम् । विषयवैतृष्ण्यादिरूपं बाह्यमाभ्यन्तरञ्च यतः मोक्षेप्से उत्पद्येते तदिति। ऐश्वर्यस्त्वणिमादयः ईश्वरभावः। एतद्विपरीतन्तामसमवगन्तव्यम्। अवगाहनमस्याः कार्यमिति तथा हि-

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते ।
तस्मात्त्रिविधंकरणंद्वारि, द्वाराणिशेषाणि [24]॥

अपि चास्याः समुत्कृष्टत्वमपि-

कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छति [25]।

एतावतेयं प्रकृतेरुत्पन्नाहङ्कारोद्भाविकाध्यवसायविशिष्टार्थप्रकाशिका-न्तःकरणेन्द्रियनियन्त्रिका सात्त्विकतामसरूपसम्पन्ना या बुद्धिः सा इह दर्शने प्रकृतिविकृतिरूपेणोस्थितेति भावः ।

**वैशेषिकदर्शनाभिमता बुद्धिः-**

न्यायवैशेषिके तन्त्रे तल्लक्षणमपर्यायात्मकम् इत्यत्र बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः [26]। अहं बुद्ध्ये इति प्रत्यक्षसिद्धः पदार्थः [27]। अत्र पर्यायकथनेन बुद्धिराद्यो परिणामोन्तःकरणविशेषोपि च पुष्करपलाशव-न्निर्लेपःपुरुषःयत्र प्रतिबिम्बते तस्याः खण्डनं स्वत एव जातमत्र मानम्- यन्मन्यते तदनेन पर्यायाभिधानसूचितप्रमानेन निराक्रियते [28]। अत्र शङ्करमिश्रव्याख्यानमुपादेयम्- बुद्धिशब्दः बुद्धतेऽनयेति करणव्युत्प-न्नः तदा मन एव तत्पर्यवस्यति, न च मनः प्रत्यक्षम्, बुद्धिस्वहं बुद्ध्ये प्रत्यक्षवेद्यैव [29]। सा चानेकप्रकारा अर्थानन्त्यात्, प्रत्यर्थनियतत्वाच्च [30]। अत्र पुनः समासतः द्विविधे विद्याविद्ये ।अविद्या संशयविप-र्ययानध्यवसानस्वप्नभेदाच्चतुर्विधम् । एकस्मिन् धर्मिणि नानाकोटिकं ज्ञानं संशयः [31]। अस्य व्युत्पत्तिपरकलक्षणं व्योमवतीकारेण कृतन्तद्द्रष्ट-व्यमेव-संशीतिः संशयः, संशय्यतेनेनात्मा, सुप्त इव भवतीति। विमर्शनं विमर्शः किम् इदम् एवम् आहोस्वित् एवं न भवतीति प्रत्ययः। स च उभयम् आलम्बते [32]। एतत्त्वन्तःबहिर्भेदेन द्विविधः [33]। गवि अश्वत्वम् अश्वे गोत्वम् इति ज्ञानमेव विपर्ययः।मिथ्याज्ञानापरपर्यायः अयथार्थ-निश्चयःविपर्ययः [34]। एतत्त्रिविधम्प्रत्यक्षभाजोनुमानभासजोन्यभासजः । संशयभिन्नः किमिदमित्याकारकज्ञानमेवानध्यवसायः । प्रत्यक्षानुमानाभ्यां द्विविधः । यथा स्मृतिज्ञानं तथैव स्वप्नज्ञानमपि। इन्द्रियव्यापाराणामुप-शमनावस्थायाम्मनः यदा लीनम्भवति तदा इन्द्रियव्यापारवन्मानवोव-लोकयति शयनावस्थायामेतदेव स्वप्नस्वरुपम् । त्रिविधो स्वप्नःसंस्का-रपाटवजन्यः, धातुदोषजन्यः, अदृष्टजन्यः [35]। यदा स्वप्नावस्थायां स्वप्नदर्शनं भवति तत्तु स्वप्नान्तिकः। विद्यापि प्रत्यक्षानुमानस्मृत्यार्ष-ज्ञानभेदाच्चतुर्विधम्। इन्द्रियार्थसंन्निकर्षोत्पन्नं ज्ञानम्, अव्यपदेश्यम्, अव्यभिचारि, व्यवसायात्मकं ज्ञानम्प्रत्यक्षम् [36]। वस्तुतः यदा इन्द्रियाणि वस्त्वन्वितानि भवन्ति तदा प्रत्यक्षम् । निर्विकल्पकसविकल्पकभेदाभ्यां द्विधम्। तत्रानुमितिकरणत्वमनुमानमेतदति प्रसिद्धम् ।तद्द्विविधं दृष्टसामान्यतोदृष्टभेदाभ्याम् [37]। अत्रेदं वक्तव्यं यत्-प्रमाणत्वेन वैशेषिके प्रत्यक्षानुमाने वर्तेते परं नैयायिकाः चत्वारि प्रमाणान्यङ्गीकुर्वन्ति तानि प्रत्यक्षानुमानोपमानशाब्दभेदात्। अत्रात्ममनसोःसंयोगविशेषात् संस्काराच्च स्मृतिः [38]। अत्राचार्यःमिश्रोपाख्यशङ्करः सूत्रीयन्तथ्यं विस्तारयति यत्-लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोःसंयोगविशेषात् पटुवभ्यात् आदरप्रत्ययजनिताच्च संस्काराद्दृष्टश्रुतानुभूतेषु शेषानुव्यवसायः मरणेच्छाद्वेषहेतुरतीतविषया स्मृतिः [39]। इयं द्विविधा यथार्थायथार्था । अत्रार्षज्ञानञ्च ऋषीणां गालवप्रभृतीनामतीतविषयकमनागतविषयकमपि च मन्त्रौषधिगुटिकाञ्जनादिभिः इष्टसाधकं ज्ञानं, सिद्धदर्शनजमपि च धर्मजन्ययथार्थपदार्थप्रतिपादकं ज्ञानमार्षज्ञानमत्र कणादमहर्षिरप्येवमेव- आर्षं सिद्धदर्शनञ्च धर्मेभ्यः [40]। एतत्तु यदा कदा लौकिकमप्यस्योदाहरणं प्रशस्तपादभाष्यकारेणात्यद्भुतम्प्रदत्तमिति- मम मनः वक्ति यत् श्वः मम भ्रातागमिष्यतीति बालिकया कदाचिद्वतीति [41]। अत्रेदम्प्रभेविवरणं किमपा वक्तव्यमस्ति यत् न्यायवैशेषिकयोःप्रभेदसन्दर्भे महान् भेदः अस्तीति। अत्रानुमानस्योभयत्वम्परं सांख्ये त्रैविध्यं [42] क्वचिदेकत्वम् [43] इति भेदादिकङ्कार्यकारणानुकूलमवगन्तव्यमिति । एतावता प्रशस्तपादाचार्या-णामभिमतभेदवर्गीकरणादरेणानुसन्धेयमिति। आनन्त्यमस्य विलक्षणम्।

**योगाभिमता बुद्धिः-** एतत्तु सर्वविदितमेव यच्चित्ताधिकरणे याः वृत्तयः तच्चाञ्चल्योपशमनाय पातञ्जलयोगगर्शनमतीवोपकारकमिति । अत्र मनोशारीरिकभावानां सामञ्जस्यानुशीलनन्दृश्यते । अत्र बुद्धेः किं रूपम् इति चिन्तने आदावेव भेदः दृश्यते- खलु मनोबुद्धिरहङ्कारः चित्तमिति अन्तःकरणपदवाच्यमस्तीति वेदान्ते परं सांख्ये योगे तु मनसः स्थानं नास्तीत्यत्र योगवार्तिककारः चित्तमन्तः करणसामान्यमेव [44] परमत्र श्रीमन्मैथिलाः आचार्यवाचस्पतिमिश्राः- चित्तशब्देनान्तःकरणं बुद्धिमुप-लक्षयति [45]। प्रत्यक्षप्रमाणनिरूपणपरकसूत्रविवरणे दृश्यते यत् बुद्धेः प्रतिसंवेदी पुरुष इति [46]। अयं भावःइन्द्रियार्थसन्निकर्षे बुद्धिः तदाकारा-कारिता भवतीति एतदेव रूपमुपस्थापयत्याचार्याः वाचस्पतिमिश्राः—इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात्तद्विषया सामान्यविशेषा-त्मनोर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षमिति [47]। अत्र विज्ञानभिक्षोः मतनुरूपमर्थावबोधे प्रतिबिम्बवादोवश्यमेव स्वीकार्यस्तथा हि- बुद्धावपि चित्प्रतिबिम्बं स्वीकार्यमन्यथा चैतन्यस्य भानानुपपत्तेः [48]। अत्रानयोः अर्थावबोधे वैमत्यन्दृढतमम् । अत्र स्मृतिप्रज्ञयोः भिन्नार्थकत्वमपि दृश्यते-श्रद्धावीर्यस्मृतिसमाधिपूर्वक इतरेषाम् [49]। अनयोः स्मृतिप्रज्ञयोः अप्येकमुत्कृष्टतमं रूपन्दृश्यते सा ऋतम्भरापदवाच्या [50]। अनया सह न्यायशास्त्रस्य आर्षज्ञानं साम्यतामाप्नोति यद्यप्युत्पत्तिक्रमे भेदःअस्ति तथाप्यर्थसाम्यमित्थम्-

आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तमम् ॥ [51]

हेयहेतुनिरूपणक्रमेस्याःदृश्यत्वेन स्वरूपन्दृश्यते [52]। अन्यच्च रूपम्प्रातिभात्मकन्तद्विवेकज्ञानस्य पूर्वरूपमपि चास्य प्रातिभात्मकबुद्-धिस्वरूपस्योहोद्भवत्वमप्युपपद्यते [53]। अपि च हृदयस्थानिकस्य चित्तस्य संयमशीलत्वात् संविदपि भवत्वत्र स्थानत्वेन भेदः यतः काणादे आत्म-वृत्तित्वमपि

च सांख्ये प्रकृतिविकृतित्वम्परमत्र हृदयस्थानिकस्य वृत्ति-विशिष्टत्वात् रूपवैविध्यमस्तीत्यस्य पातञ्जलस्य वैशिष्ट्यम् ।

**न्यायाभिमता बुद्धिः-** न्यायशास्त्रीयषोडशपदार्थेष्वन्यतमम्प्रमेयमिति अत्र आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् [54]। बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति [55] पर्यायप्रदर्शनपर-कसूत्रोपन्यासेन बुद्धेः जडत्वमस्य सांख्यमतस्योपेक्ष्यत्वसम्पादनायैव पुनः बुद्धिः मनसः अपि पर्यायः [56]। अस्याः अनित्यत्वमस्ति । इयमु-त्पत्तियुतात्र वात्स्यायनभाष्यकारःउत्पन्नापवर्गिणी बुद्धिरिति प्रतिषेद्-धव्यं तदेवाभ्यनुज्ञायते विद्युत्संपाते रूपाव्यक्तग्रहणदिति। यत्राव्यक्त-ग्रहणं तत्रोत्पन्नापवर्गिणी बुद्धिरिति [57]। परिशेषानुमानादात्मवृत्तित्वम्। ज्ञानाधारितप्रामाण्यसन्दर्भे परतस्त्वमुपपद्यते । अस्य भेदः अपि वैशेषिकदर्शनवत्परन्तत्रार्षज्ञातर्यन्तानुधावनमत्र ईषत्संकोचः। विषयेस्मिन् न्यायवैशेषिकयोः साम्यमेव परमनयोः सांख्यसिद्धान्तेन सह महान् भेदः। भवतूत्पत्तिसन्दर्भे उत स्थानविषयेथवा नित्यानित्यविषये । अत्र भावपदार्थानामुपस्थापनम्भवतु परं यथार्थोपलब्धिस्त्वनया नोपक्षिप्यते यतः भावपदार्थानां विवेचनमपि च तद्यथार्थोपलब्धिस्तु परस्परं भिन्नं भिन्नम् [58]। एवञ्चास्य न्यायदर्शनस्य बुद्धिसन्दर्भितं विवेचनमुत्कृष्टं महत्तमम् ।एतद्विवृतभेदमारेखिकृत्य प्रस्तूयते-




अत्रानुमित्यादीनां प्रपञ्चोऽशम्यः अतः नोपन्यस्यते।

**वेदान्ताभिमता बुद्धिः** – वेदान्तशास्त्रेन्तःकरणगतवृत्तिवैशिष्ट्यात् विविधपदार्थानामुपस्थितिः दृश्यते । अत्र संकल्पविकल्पादियुतत्वात् मनः, पदार्थाध्यवसायधर्मान्वितत्वात् बुद्धिः, अहमित्यभिमानदहङ्कृतिः, स्वार्थानुसन्धानगुणगणान्वितत्वान्मनः [59]। अत्रान्तःकरणमेव प्रधानम्परं तद्गता या वृत्तिः सा अर्थनिर्धारिका ।परं सूक्ष्मशरीरविवरणप्रकरणे बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः मनो नाम सङ्कल्पविकल्पा- त्मिकान्तःकरणवृत्तिः अनयोरेव चित्ताहङ्कारयोरन्तर्भावः [60]। अनया लिङ्गशरीरनिर्माणं भवतीति-

बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया ।
शरीरं सप्तदशभिः सूक्ष्ममं तल्लिङ्गमुच्यते [61]॥

लिङ्गशरीरघटकीभूतेयं बुद्धिः मनसः आनन्तर्यमधिगच्छति तथा च देहात् प्राणः, प्राणात् मनः, ततः कर्ता, ततः भोक्ता इति गुहायाः या पारम्पर्यक्रमः तदनुरूपमेव [62]। अत्रास्याः कर्तृत्वमपि सूपपन्नम् । न्यायवैशेषिकयोः यज्ज्ञानं तदत्र चिद्रूपमस्यार्थप्रकाशकत्वमिति भामती-काराभिप्रायः [63]। एतावतात्र गम्यते यत् बुद्धेः कर्तृत्वं, लिङ्गशरीरसाध-कत्वमपि च चित्वमर्थप्रकाशकत्वम्, उत ब्रह्मत्वमुपपद्यते । स्वप्नावस्था भवतु उताहो तद्भिन्नावस्था अस्याः एकरूपत्वमेव गम्यते एतुदेवास्याः वैशिष्ट्यम् । अतोन्ते पञ्चदशीकारस्य पदजातं प्रदाय वैदान्तनुशीलनं स्थाप्यते-

शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक् ।
ततो विभक्ता तत्संविदैकरूपा न भिद्यते [64]॥ इति

जैनाभिमता बुद्धिः-अध्यार्हतदर्शन्त्रिरत्नस्वरूपोपस्थानन्दृश्यतेत्र तत्वार्थ-सूत्रम्-सम्यग्दर्शनज्ञानचारात्राणि मोक्षमार्गः [65]। अत्र सम्यज्ज्ञानन्नाम वस्तुनः याथातथ्येनोपगम्यत्वमेव । पदार्थानां यद्रूपत्वं ताद्रूप्यत्वेनोप-स्थापितत्वमवगतत्वमपि च व्यवहृतत्त्वञ्चेदस्य सम्यग्ज्ञानस्य स्वरुपम् आयातीत्यत्र ज्ञानस्य विषयस्वरूपाधिष्ठानत्वमुपपन्नम्भवतीत्यत्र मानम्

यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा ।
यथावबोधस्तमत्राहुः सम्यज्ञानं मनीषिणः [66]॥

अस्याः पञ्चविधत्वं-मतिश्रुतावधिमनःपर्यायकेवलभेदात्। अत्र यथार्थ-मननवृत्तित्वान्मतित्वम्। मतिजन्यत्वाच्छ्रुततत्वम्।सम्यग्दर्शनादिजन्यत्वे-सत्यविच्छिन्नविषयत्वमत्रावधित्वम्। मनोगतार्थ-परिच्छेदकत्वमत्र मनःपर्यायत्वम्। अपि च कैवल्यार्थमप्रयुक्तं ज्ञानं कैवल्यम्।एवञ्चात्र विषयस्य प्राधान्यं संगच्छते परं विषयः आवरणेनावृते चेत् का कथा इत्यार्हतार्थः परिप्रश्नः।

**बौद्धाभिमता बुद्धिः-** बुद्धिरेवात्मा एतत्तथ्यमाश्रित्य बुद्धिपदार्थमुप-स्थापयति बौद्धाःतत्तु श्रुत्यनुकूलमेव तत्रापि आत्मनः विज्ञानमयत्वं दृश्यते । जैनदर्शनादिवतदत्रापि त्रिरत्नत्वन्तत्र प्रज्ञाविवरणेस्याः रूपत्वं सूपपन्नं भवति। श्रुतिमयीत्वं, चिन्तामयीत्वं, भावनामयीत्वमिति भेदात् त्रैविध्यम्। आत्मदीपो भव अनेन बुद्धेः प्रकाशकत्वमेव संपादयति । एतेषान्नये पञ्चस्कन्धेषु विज्ञानत्वन्तस्यास्स्वरुपम्।तच्च संवेदनास-मूहत्वमेव [67]। अत्र क्वचित् सांम्यत्वं क्वचिद्वैपरीत्यञ्च दृश्यते । विभेदे-ष्वपि भ्रामकसापेक्षनिरपेक्षादीनां स्वरूपनवगन्तव्यम्।

**चार्वाकाभिमता बुद्धिः-** चार्वाकदर्शने शरीरात्मवादस्य स्वरूपमधिगम्यते अत्र शरीरमेवात्मा इत्यस्तीति प्रत्ययविशेषः। खलु शरीरं नाम किम् इति प्रश्ने चैतन्यमेव शरीरम्।शरीरसत्वे चैतन्यसत्वन्तदभावे चैतम्या-भावः, स्थूलादीनामनुभवानां शरीरस्थितत्वाच्चैतन्यस्य तत्त्वं, घृतादिभक्षणे बुद्धेः शरीरस्य च विकासः। अतः प्रज्ञापाटवत्वं जायते ।एतावता शरीरं चैतन्योपबद्धम् इति बौद्धवस्तु बुद्धिसंदर्भे ज्ञातव्यम् इति [68]।

एतावतद्वाङ्मयानुशीलनजन्यपदार्थोपपादनक्रमेनुसन्धानसन्धानेयं वैशिष्ट्यं साम्यमसाम्यन्निरूपयति बुद्धिस्वरूपसंन्दर्भेर्थप्रकाशकत्वमित्येकपक्षस्तर्हि वेदान्तबौद्धनयेस्याः विषयादीषु समत्वमपि च दृष्टान्तसन्दर्भे बुद्धिस्थानिकपदाय दीपपदो-पयुक्तत्वम् । क्वचिच्चित्वङ्क्वचिदानन्दत्वमपि क्वचित्संवेदनात्वम् । न्याये प्रमेयत्वं, वैशेषिके आत्मविशेषगुणत्वं,चार्वाकमते आत्मतत्त्वमेव । अध्यवसायत्वं, प्रकाशकत्वं, प्रकाश्यत्वं, ज्ञानादिपर्यायत्वं, निराकारत्वं, विषयप्रवणत्वं, व्यवहारहेतुत्वं, प्रकृतिविकृतित्वं, चित्त्वं, चित्तत्वञ्च, जडत्वं, ऋतम्भरात्वम्पर्यवसितम् । बुद्धिभेदसन्दर्भे विषयग्राहकत्वेनैकरूपत्वम्परं संख्यया वैविध्यन्दृग्गोच-रीभवतीति । आप्तत्वहेतुतयापि साम्यत्वमुररीकर्तव्यम्।

पदार्थसन्दर्भेयं बुद्धि प्रमाणत्वम्प्रमेयत्वङ्गुणत्वमात्मतत्त्वन्त्रिरत्नान्त-र्गतत्वमुपपद्यते। स्थानसन्दर्भेयं हृदये, आत्मनि, शरीरे, मनसि स्थितेयम्पदार्थम्प्रकाशयति । इति शिवार्पणमस्तु ॥

**संधर्व सूचि**


1. तर्कसंग्रह-किरणावलीटीका पृसं-7
2. न्यायसूत्र -1.1.15
3. व्योमवती पृ.सं-521
4. दुर्गासप्तशती -5 अध्याय
5. सप्तपदार्थी-पृ.सं-76
6. गौतमसूत्रवृत्ति-1-1-15
7. तर्कदीपिका-पृ.सं-14
8. लक्षणावलि,न्यायकोश-पृ.सं-604
9. तार्किकरक्षा श्लोकसं-29
10. वैशेषिकोपस्कारः-8-1-1
11. सांख्यभा.-1-64
12. न्यायकोश-पृ.सं-605
13. वै.द.प.नि.कुमार शशिप्रभा पृ.सं-308
14. कणादरहस्यम्-88
15. त,सं
16. सां.का.-22
17. सां.का-23
18. वाचस्पत्यम्
19. न्याय को.पृ.सं-16
20. गौडपादभाष्य श्लोक सं-23
21. सा. का-5
22. सा,का-37
23. सा का-23
24. सा.का.-35
25. सा. का-36
26. प्र.पा.भा.-136
27. वै.सूत्रोपस्कार पृ.सं-449
28. तथैव
29. तथैव
30. प्र. पा. भा.पृ-136
31. त.स.
32. व्योमवती पृ सं-535-536
33. प्र.पा.भा.पृ.सं-140
34. गौ.वृ.सू.4-1-3
35. प्र.पा.भा.पृ-149
36. न्यायदर्शनम्-1-1-4
37. प्र.पा. भा. पृ-169
38. वै.सू.-9-2-6
39. वै.सू.उप.पृ.सं-512
40. वै.सू.-9-2-13
41. प्र.पा.भा.पृ.सं-208
42. सा.का.-5
43. न्यायकोश पृ.सं-32
44. यो.वा.पृ-12
45. त.वै.पृ-7
46. पा.यो.द.सू.-7
47. त.वै.पृ-27
48. यो.वा.पृ-22
49. पा.यो.द.समाधिपाद,सूत्रसं-20
50. तथैव-48
51. तथैव-48
52. पा.यो.द.साधनपाद सूत्र-17
53. पा.यो.द.विभूतिपादःसूत्र-33
54. न्यायसूत्र-1-1-9
55. न्यायसूत्र-1-1-15
56. न्यायसूत्र-1-1-17
57. न्यायदर्शनम् पृ.सं-428
58. न्यायसूत्र-4-2-26 एवं27
59. विवेकचूडामणि-95एवं96
60. वेदान्तसार पृ.सं-185
61. पञ्चदशी.श्लोक-23
62. पञ्चदशी. को. वि. प्र. श्लोक-2
63. भा.टी.1-1-1
64. पञ्चदशी-4
65. तत्वार्थसूत्र-1-1
66. सर्व.द.सं. पृसं-137(ऋषि)
67. भारतीय.द.की रूपरेखा पृसं-123(प्रो.हरेन्द्र.प्र.)
68. भा.द.(बलदेवोपाध्याय)पृसं-88